# श्रीमद् भागवत रसिक कुटुंब

## लक्ष्मीस्तोत्रम्

ॐ अरुणकमलसंस्था तद्रजःपुञ्जवर्णा,
करकमलधृतेष्टाभीतियुग्माम्बुजा च।
मणिकटकविचित्राऽऽलंकृताकल्पजालैः(स्),
सकलभुवनमाता सततं श्रीः श्रियै नः।।

इंद्र उवाच

ॐ नमः(ख्) कमलवासिन्यै , नारायण्यै नमो नमः।
कृष्णप्रियायै सारायै, पद्मायै च नमो नमः॥1॥

पद्मपत्रेक्षणायै च, पद्मास्यायै नमो नमः।
पद्मसनायै पद्मिन्यै, वैष्णव्यै च नमो नमः॥2॥

सर्वसम्पत्स्वरूपायै, सर्वदात्र्यै नमो नमः।
सुखदायै मोक्षदायै, सिद्धिदायै नमो नमः॥3॥

हरिभक्तिप्रदात्र्यै च, हर्षदात्र्यै नमो नमः।
कृष्णवक्षःस्थितायै च, कृष्णेशायै नमो नमः॥4॥

कृष्णशोभास्वरूपायै, रत्नपद्मे च शोभने।
संपत्त्यधिष्ठातृदेव्यै, महादेव्यै नमो नमः॥5॥

शस्याधिष्ठातृदेव्यै च, शस्यायै च नमो नमः।
नमो बुद्धिस्वरूपायै, बुद्धिदायै नमो नमः॥6॥

वैकुण्ठे या महालक्ष्मीर्- या लक्ष्मीः क्षीरसागरे।
स्वर्गलक्ष्मीरिन्द्रगेहे, राजलक्ष्मीर्नृपालये॥7॥

गृहलक्ष्मीश्च गृहिणां(ङ्), गेहे च गृहदेवता।
सुरभिः(स्) सा गवां माता, दक्षिणा यज्ञकामिनी॥8॥

अदितिर्देवमाता त्वं(ङ्), कमला कमलालये।
स्वाहा त्वं(ञ्) च हविर्दाने, कव्यदाने स्वधा स्मृता॥9॥

त्वं हि विष्णुस्वरुपा च, सर्वधारा वसुंधरा।
शुद्धसत्त्वस्वरूपा त्वं(न्), नारायणपरायणा॥10॥

क्रोधहिंसावर्जिता च, वरदा च शुभानना।
परमार्थप्रदा त्वं(ञ्) च, हरिदास्यप्रदा परा॥11॥

यया विना जगत्सर्वं, भस्मीभूतमसारकम्।
जीवन्मृतं(ञ्) च विश्वं(ञ्) च , शवतुल्यं(यँ) यया विना॥12॥

सर्वेषां(ञ्) च परा त्वं हि,  सर्वबान्धवरूपिणी।
यया विना न संभाष्यो,  बान्धवैर्बान्धवः(स्) सदा॥13॥

त्वया हीनो बन्धुहीनो, त्वया युक्तः(स्) सबान्धवः।
धर्मार्थकाममोक्षाणां(न्),  त्वं(ञ्) च कारणरूपिणी॥14॥

यथा माता स्तनन्धानां,  शिशूनां शैशवे यथा।
तथा त्वं सर्वदा माता,  सर्वेषां सर्वरूपतः॥15॥

मातृहीनः(स्) स्तनान्धश्च , स चेज्जीवति दैवतः।
त्वया हीनो जनः(ख्) कोऽपि , न जीवत्येव निश्चितम्॥16॥

सुप्रसन्नस्वरूपा त्वं , मां प्रसन्ना भवाम्बिके।
वैरिग्रस्तं(ञ्) च विषयं(न्),  देहि मह्यं सनातनि॥17॥

वयं(यँ) यावत् त्वया हीना,  बन्धुहीनाश्च भिक्षुकाः।
सर्वसंपद्विहीनाश्च , तावदेव हरिप्रिये॥18॥

राज्यं(न्) देहि श्रियं(न्) देहि , बलं(न्) देहि सुरेश्वरि।
कीर्तिं(न्) देहि धनं(न्) देहि,  यशो मह्यं(ञ्) च देहि वै॥19॥

कामं(न्) देहि मतिं(न्) देहि,  भोगान् देहि हरिप्रिये।
ज्ञानं(न्) देहि च धर्मं(ञ्) च,  सर्वसौभाग्यमीप्सितम्॥20॥

प्रभावं(ञ्) च प्रतापं(ञ्) च, सर्वाधिकारमेव च ।
जयं पराक्रमं(यँ) युद्धे, परमैश्वर्यमेव च॥21॥

फलश्रुतिः

इदं स्तोत्रं महापुण्यं(न्), त्रिसंध्यं(यँ) यः(फ्) पठेन्नरः।
कुबेरतुल्यः(स्) स भवेद्, राजराजेश्वरो महान्॥22॥

सिद्धस्तोत्रं(यँ) यदि पठेत्, सोऽपि कल्पतरुर्नरः।
पञ्चलक्षजपेनैव, स्तोत्रसिद्धिर्भवेन्नृणाम्॥23॥

सिद्धिस्तोत्रं(यँ) यदि पठेन्- मासमेकं(ञ्) च संयतः।
महासुखी च राजेन्द्रो, भविष्यति न संशयः॥24॥

॥ इति श्री ब्रह्मवैवर्तपुराणे इंद्रकृतं(लँ) लक्ष्मीस्तोत्रं संपूर्णम्॥